# DAILYBHAJAN

## Aigiri Nandini Lyrics in English

Ayi giri nandini, nandhitha medhini,
Viswa vinodhini nandanuthe,
Girivara vindhya sirodhi nivasini,
Vishnu Vilasini Jishnu nuthe,
Bhagawathi hey sithi kanda kudumbini,
Bhoori kudumbini bhoori kruthe,
Jaya Jaya He Mahishasura Mardini, Ramya Kapardini Shaila Suthe-

Suravara varshini, durdara darshini,
Durmukhamarshani, harsha rathe,
Tribhuvana poshini, Sankara thoshini,
Kilbisisha moshini, ghosha rathe,
Danuja niroshini, Dithisutha roshini,
Durmatha soshini, Sindhu suthe,
Jaya Jaya Hey Mahishasura Mardini, Ramya Kapardini Shaila Suthe

Ayi Jagadambha Madambha, Kadambha,
Vana priya vasini, Hasarathe,
Shikhari siromani, thunga Himalaya,
Srunga nijalaya, madhyagathe,
Madhu Madure, Mdhukaitabha banjini,
Kaitabha banjini, rasa rathe,
Jaya Jaya He Mahishasura Mardini, Ramya Kapardini Shaila Suthe

Ayi satha kanda, vikanditha runda,
Vithunditha shunda, Gajathipathe,
Ripu Gaja ganda, Vidhaarana chanda,

Paraakrama shunda, mrugathipathe,
Nija bhuja danda nipaathitha khanda,
Vipaathitha munda, bhatathipathe,
Jaya Jaya He Mahishasura Mardini, Ramya Kapardini Shaila Suthe

Ayi rana durmathaShathru vadhothitha,
Durdhara nirjjara, shakthi bruthe,
Chathura vicharadureena maha shiva,
Duthatkrutha pramadhipathe,
Duritha Dureeha, dhurasaya durmathi,
Dhanava dhutha kruithaanthamathe,
Jaya Jaya He Mahishasura Mardini, Ramya Kapardini Shaila Suthe

Ayi saranagatha vairi vadhuvara,
Veera varaa bhaya dhayakare,
Tribhuvana masthaka soola virodhi,
Sirodhi krithamala shoolakare,
Dimidmi thaamara dundubinadha mahaa
Mukharikruthatigmakare,
Jaya Jaya He Mahishasura Mardini, Ramya Kapardini Shaila Suthe

Ayi nija huum kruthimathra niraakrutha,
Dhoomra vilochana Dhoomra sathe,
Samara vishoshitha sonitha bheeja,
Samudhbhava sonitha bheejalathe,
Shiva shiva shumbha nishumbhamaha hava,
Tarpitha bhootha pisacha rathe,
Jaya Jaya He Mahishasura Mardini, Ramya Kapardini Shaila Suthe

Dhanu ranushanga rana kshana sanga,
Parisphuradanga natath katake,
Kanaka pishanga brushathka nishanga,
Rasadbhata shrunga hatavatuke,

Kritha chaturanga bala kshithirangakadath,
Bahuranga ratadhpatuke,
Jaya Jaya He Mahishasura Mardini, Ramya Kapardini Shaila Suthe

Sura Lalanata Tatheyi Tatheyi Tathabhi Nayottama Nrtya Rate
Hasa Vilasa Hulasa Mayi Prana Tartaja Nemita Prema Bhare
Dhimi Kita Dhikkata Dhikkata Dhimi Dhvani Ghora Mrdanga Ninada Late
Jaya Jaya He Mahishasura Mardini, Ramyaka Pardini Shaila Suthe

Jaya Jaya hey japya jayejaya shabda,
Parastuti tatpara vishvanute,
Bhana Bhanabhinjimi bhingrutha noopura,
Sinjitha mohitha bhootha pathe,
Nadintha nataartha nadi nada nayaka,
Naditha natya sugaanarathe,
Jaya Jaya He Mahishasura Mardini, Ramya Kapardini Shaila Suthe

Ayi sumana sumana,
Sumana sumanohara kanthiyuthe,
Sritha rajani rajani rajani,
Rajaneekaravakthra vruthe,
Sunayana vibhramarabhrama,
Bhramarabrahmaradhipadhe,
Jaya Jaya He Mahishasura Mardini, Ramya Kapardini Shaila Suthe

Sahitha maha hava mallama hallika,
Mallitharallaka mallarathe,
Virachithavallika pallika mallika billika,
Bhillika varga Vruthe,
Sithakruthapulli samulla sitharuna,
Thallaja pallava sallalithe,
Jaya Jaya He Mahishasura Mardini, Ramya Kapardini Shaila Suthe

Avirala ganda kalatha mada medura,
Matha matanga rajapathe,
Tribhuvana bhooshana bhootha kalanidhi,
Roopa payonidhi raja suthe,
Ayi suda thijjana lalasa manasa,
Mohana manmatha raja suthe,
Jaya Jaya He Mahishasura Mardini, Ramya Kapardini Shaila Suthe

Kamala dalaamala komala kanthi,
Kala kalithaamala bala lathe,
Sakala vilasa Kala nilayakrama,
Keli chalathkala hamsa kule,
Alikula sankula kuvalaya mandala,
Mauli miladh bhakulalikule,
Jaya Jaya He Mahishasura Mardini, Ramya Kapardini Shaila Suthe

Kara murali rava veejitha koojitha,
Lajjitha kokila manjumathe,
Militha pulinda manohara kunchitha,
Ranchitha shaila nikunjakathe,
Nija guna bhootha maha sabari gana,
Sathguna sambrutha kelithale,
Jaya Jaya He Mahishasura Mardini, Ramya Kapardini Shaila Suthe

Kati thata peetha dukoola vichithra,
Mayuka thiraskrutha Chandra ruche,
Pranatha suraasura mouli mani sphura,
Damsula sannka Chandra ruche,
Jitha kanakachala maulipadorjitha,
Nirbhara kunjara kumbhakuche,
Jaya Jaya He Mahishasura Mardini, Ramya Kapardini Shaila Suthe

Vijitha sahasra karaika sahasrakaraika,
Sarakaraika nuthe,
Krutha sutha tharaka sangaratharaka,
Sangaratharaka soonu suthe,
Suratha Samadhi samana Samadhi,
Samadhi Samadhi sujatharathe,
Jaya Jaya He Mahishasura Mardini, Ramya Kapardini Shaila Suthe-

Padakamalam karuna nilaye varivasyathi,
yo anudhinam sa shive,
Ayi kamale kamala nilaye kamala nilaya
Sa katham na bhaveth,
Thava padameva param ithi
Anusheelayatho mama kim na shive,
Jaya Jaya He Mahishasura Mardini, Ramya Kapardini Shaila Suthe

Kanakala sathkala sindhu jalairanu
Sinjinuthe guna ranga bhuvam,
Bhajathi sa kim na Shachi kucha kumbha
Thati pari rambha sukhanubhavam,
Thava charanam saranam kara vani
Nataamaravaaninivasi shivam,
Jaya Jaya He Mahishasura Mardini, Ramya Kapardini Shaila Suthe

Thava Vimalendu kulam vadnedumalam
Sakalayananu kulayathe,
Kimu puruhootha pureendu mukhi
Sumukhibhee rasou vimukhi kriyathe,
Mama thu matham shivanama dhane
Bhavathi krupaya kimu na kriyathe,
Jaya Jaya hey Mahishasura mardini, Ramya kapardini, shaila Suthe

Ayi mai deena dayalu thaya krupayaiva
Thvaya bhavthavyam ume,
Ayi jagatho janani kripayaa asi
thatha anumithasi rathe
Na yaduchitham atra bhavathvya rari kurutha,
durutha pamapakarute
Jaya Jaya He Mahishasura Mardini, Ramya Kapardini Shaila Suthe

# Aigiri Nandini Lyrics in Sanskrit

अयि गिरिनन्दिनि नन्दितमेदिनि विश्वविनोदिनि नन्दिनुते
गिरिवरविन्ध्यशिरोऽधिनिवासिनि विष्णुविलासिनि जिष्णुनुते ।
भगवति हे शितिकण्ठकुटुम्बिनि भूरिकुटुम्बिनि भूरिकृते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १ ॥

सुरवरवर्षिणि दुर्धरधर्षिणि दुर्मुखमर्षिणि हर्षरते
त्रिभुवनपोषिणि शङ्करतोषिणि किल्बिषमोषिणि घोषरते
दनुजनिरोषिणि दितिसुतरोषिणि दुर्मदशोषिणि सिन्धुसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ २ ॥

अयि जगदम्ब मदम्ब कदम्ब वनप्रियवासिनि हासरते
शिखरि शिरोमणि तुङ्गहिमलय शृङ्गनिजालय मध्यगते ।
मधुमधुरे मधुकैटभगञ्जिनि कैटभभञ्जिनि रासरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ३ ॥

अयि शतखण्ड विखण्डितरुण्ड वितुण्डितशुण्द गजाधिपते
रिपुगजगण्ड विदारणचण्ड पराक्रमशुण्ड मृगाधिपते ।
निजभुजदण्ड निपातितखण्ड विपातितमुण्ड भटाधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ४ ॥

अयि रणदुर्मद शत्रुवधोदित दुर्धरनिर्जर शक्तिभृते
चतुरविचार धुरीणमहाशिव दूतकृत प्रमथाधिपते ।
दुरितदुरीह दुराशयदुर्मति दानवदुत कृतान्तमते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ५ ॥

अयि शरणागत वैरिवधुवर वीरवराभय दायकरे
त्रिभुवनमस्तक शुलविरोधि शिरोऽधिकृतामल शुलकरे ।
दुमिदुमितामर धुन्दुभिनादमहोमुखरीकृत दिङ्गकरे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ६ ॥

अयि निजहुङ्कृति मात्रनिराकृत धूम्रविलोचन धूम्रशते
समरविशोषित शोणितबीज समुद्भवशोणित बीजलते ।
शिवशिवशुम्भ निशुम्भमहाहव तर्पितभूत पिशाचरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ७ ॥

धनुरनुषङ्ग रणक्षणसङ्ग परिस्फुरदङ्ग नटत्कटके
कनकपिशङ्ग पृषत्कनिषङ्ग रसद्भटशृङ्ग हताबटुके ।
कृतचतुरङ्ग बलक्षितिरङ्ग घटद्बहुरङ्ग रटद्बटुके
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ८ ॥

सुरललना ततथेयि तथेयि कृताभिनयोदर नृत्यरते
कृत कुकुथः कुकुथो गडदादिकताल कुतूहल गानरते ।

धुधुकुट धुक्कुट धिंधिमित ध्वनि धीर मृदंग निनादरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ९ ॥

जय जय जप्य जयेजयशब्द परस्तुति तत्परविश्वनुते
झणझणझिञ्झिमि झिङ्कृत नूपुरशिञ्जितमोहित भूतपते ।
नटित नटार्ध नटी नट नायक नाटितनाट्य सुगानरते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १० ॥

अयि सुमनःसुमनःसुमनः सुमनःसुमनोहरकान्तियुते
श्रितरजनी रजनीरजनी रजनीरजनी करवक्त्रवृते ।
सुनयनविभ्रमर भ्रमरभ्रमर भ्रमरभ्रमराधिपते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ ११ ॥

सहितमहाहव मल्लमतल्लिक मल्लितरल्लक मल्लरते
विरचितवल्लिक पल्लिकमल्लिक झिल्लिकभिल्लिक वर्गवृते ।
शितकृतफुल्ल समुल्लसितारुण तल्लजपल्लव सल्ललिते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १२ ॥

अविरलगण्ड गलन्मदमेदुर मत्तमतङ्गजराजपते
त्रिभुवनभूषण भूतकलानिधि रूपपयोनिधि राजसुते ।
अयि सुदतीजन लालसमानस मोहन मन्मथराजसुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १३ ॥

कमलदलामल कोमलकान्ति कलाकलितामल भाललते
सकलविलास कलानिलयक्रम केलिचलत्कल हंसकुले ।
अलिकुलसङ्कुल कुवलयमण्डल मौलिमिलद्बकुलालिकुले
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १४ ॥

करमुरलीरव वीजितकूजित लज्जितकोकिल मञ्जुमते
मिलितपुलिन्द मनोहरगुञ्जित रञ्जितशैल निकुञ्जगते ।
निजगणभूत महाशबरीगण सद्गुणसम्भृत केलितले
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १५ ॥

कटितटपीत दुकूलविचित्र मयुखतिरस्कृत चन्द्ररुचे
प्रणतसुरासुर मौलिमणिस्फुर दंशुलसन्नख चन्द्ररुचे
जितकनकाचल मौलिमदोर्जित निर्भरकुञ्जर कुम्भकुचे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १६ ॥

विजितसहस्रकरैक सहस्रकरैक सहस्रकरैकनुते
कृतसुरतारक सङ्गरतारक सङ्गरतारक सूनुसुते ।
सुरथसमाधि समानसमाधि समाधिसमाधि सुजातरते ।
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १७ ॥

पदकमलं करुणानिलये वरिवस्यति योऽनुदिनं सुशिवे
अयि कमले कमलानिलये कमलानिलयः स कथं न भवेत् ।
तव पदमेव परम्पदमित्यनुशीलयतो मम किं न शिवे
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १८ ॥

कनकलसत्कलसिन्धुजलैरनुषिञ्चति तेगुणरङ्गभुवम्
भजति स किं न शचीकुचकुम्भतटीपरिरम्भसुखानुभवम् ।
तव चरणं शरणं करवाणि नतामरवाणि निवासि शिवम्
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ १९ ॥

तव विमलेन्दुकुलं वदनेन्दुमलं सकलं ननु कूलयते
किमु पुरुहूतपुरीन्दु मुखी सुमुखीभिरसौ विमुखीक्रियते ।
मम तु मतं शिवनामधने भवती कृपया किमुत क्रियते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ २० ॥

अयि मयि दीन दयालुतया कृपयैव त्वया भवितव्यमुमे
अयि जगतो जननी कृपयासि यथासि तथानुमितासिरते ।
यदुचितमत्र भवत्युररीकुरुतादुरुतापमपाकुरुते
जय जय हे महिषासुरमर्दिनि रम्यकपर्दिनि शैलसुते ॥ २१ ॥